# संस्कृतवार्ताः

**दिनाङ्क :-22.11.2024**

**प्रात: - 06:55**

**प्रधानमंत्री-गुयाना**

समावेशी समाजस्य निर्माणार्थं लोकतन्त्रात् महत्तरं साधनं नास्ति इति प्रधानमन्त्री नरेन्द्रमोदी बोधितवान्। गतसायं गुयाना-संसदः विशेषसत्रं सम्बोधयन् श्रीमोदी अवदत् यत् अग्रे गन्तुं विश्वस्य समक्षं सर्वाधिकं सशक्तः मन्त्रः अस्ति लोकतन्त्रं प्रथमं, मानवता प्रथमं इति। सः अवदत् यत् लोकतन्त्रम् अस्माकं शरीरे, अस्माकं दृष्टौ, अस्माकं आचरणे च सन्निहित: अस्ति। प्रधानमन्त्री मोदी उक्तवान् यत् विश्वस्य कस्मिन् अपि देशे संकटावधौ भारतस्य निष्कपट-प्रयासः भवति यत् साहाय्यार्थं हस्तं प्रसारयितुं। भारत गुयाना-देशयोः बन्धनं विशिष्टम् इति सः अवदत्। श्रीमोदी उल्लेखितवान् यत् प्रायः अशीत्यधिकैक शत् वर्षपूर्वं प्रथमवारं कश्चन भारतीयः गुयानादेशम् आगतः, ततः परं भारतं गुयाना च सर्वदा परस्परं समीपस्थौ स्तः।

**राष्ट्रपति-हैदराबाद:**

राष्ट्रपतिः द्रौपदी मुर्मुः संकल्पदीपं प्रज्वाल्य देशं निरन्तरविकासमार्गे अग्रे नेतुम् संकल्पं कर्तुं जनान् आग्रहं कृतवती। हैदराबादनगरे कोटीदीपोत्सवम्, इत्यस्मिन् कार्यक्रमे स्वस्य द्विदिवसीययात्रायाः समये विशालसमागमं सम्बोधयन् राष्ट्रपतिमुर्मु: जनान् सत्यधर्मयोः मार्गस्य अनुसरणं कर्तुं संकल्पं नेतुं, वञ्चितानाम् कल्याणाय कार्यं कर्तुं च आह्वानं कृतवती। राष्ट्रपतिमुर्मुः अद्य प्रातः अन्तर्राष्ट्रीयसांस्कृतिकमहोत्सवस्य लोकमन्थनस्य चतुर्थसंस्करणस्य औपचारिकं शुभारम्भं करिष्यति।

**रक्षामन्त्री-आसियान**

रक्षामन्त्री राजनाथसिंहः, अमेरिकी रक्षासचिवः लॉयड् ऑस्टिनः च भारत-अमेरिका-रक्षा सहभागित्वेन प्रगतेः प्रशंसाम् अकुरूताम्, यत् परिचालनसमन्वयस्य सम्वर्धने, सूचनासहभागितायाम्, औद्योगिकनवीनीकरणे च आधारितम् अस्ति। ह्य: लाओस्-देशस्य वियतियाने-नगरे आसियान-रक्षामन्त्रिणां ११-तमस्य (ADMM+) इत्यस्य समागमे उभौ नेतारौ मिलितवन्तौ। रक्षामन्त्रालयेन विज्ञप्तौ उक्तं यत् अमेरिका-भारत-रक्षा-औद्योगिक-सहकार-दिग्दर्शिकायाः अन्तर्गतं विलक्षण-प्रगतिः उभयपक्षेण स्वीकृता।

## खैबर पख्तुनख्वा

पाकिस्ताने खैबरपख्तुनख्वाप्रान्तस्य कुर्रम-मण्डले ह्यः यात्रीवाहनेषु भुशुण्डीधारिभिः द्वारा गोलीकाण्डे मृतकानां संख्या पञ्चचत्वारिंशत् जाता, अन्ये विंशतिः जनाः घातिताः। एतत् मण्डलं अफगानिस्तान देशस्य सीमायाः समीपे अस्ति। पाकिस्तानस्य गृहमन्त्री मोहसिन् नकवी इत्यनेन एतस्य क्षतेः पुष्टीकृता। मण्डलारक्षि दलस्य, चिकित्सालयस्य च अधिकारिणः उक्तवन्तः यत् पीडितेषु सुरक्षाकर्मचारिणः, महिलाः, बालकाः च सन्ति। मृतानां संख्या इतोपि वर्धितुं शक्नोति इति। आक्रमणकारिणां अन्वेषणार्थं आरक्षीदलैः अन्वेषणाभियानं आरब्धम्, परन्तु आक्रमणस्य उत्तरदायित्वं केनाऽपि समूहेन न स्वीकृतम्।

## क्रिकेट्-क्रीडायां भारत-ऑस्ट्रेलिया

क्रिकेट्-क्रीडायां भारत-ऑस्ट्रेलिया-देशयोः मध्ये बॉर्डर्-गावास्कर-ट्राफीति-क्रीडायाः प्रथमस्य निकष-द्वन्द्वस्य आरम्भः अद्य पर्थ-नगरस्य ऑप्टस्-क्रीडाङ्गणे भविष्यति। भारतीयसमयानुसारं प्रातः पञ्चाशन्निमेषाधिक सप्त वादने क्रीडायाः आरम्भो भविष्यति।

## चीनमास्टर्स्-बैडमिण्टनप्रतियोगितायां

चतुर्विंशत्यधिक द्विसहस्रतम वर्षस्य चीनमास्टर्स् बैडमिण्टनप्रतियोगितायां भारतीय क्रीडकः लक्ष्यसेनः अद्य शेनझेन नगरे पुरुषैकलस्य प्रागुपान्त्यचक्रीय-क्रीडायां डेन्मार्कस्य एण्डर्स् एण्टोन्सेन्-इत्यनेन सह द्वन्द्वं करिष्यति। ह्यः द्वितीयपार्यां डेन्मार्कदेशस्य रासमस् गेम्के इत्यस्मै एकविंशति-षोडश, एकविंशतिः-अष्टादश इत्यंकान्तरालेन पराजित्य लक्ष्य सेनः स्वस्थानं सुरक्षितवान्।